दिनाङ्क :- 19.06.2025

प्रात: - 06:55

प्रधानमन्त्री – क्रोएशिया

प्रधानमन्त्री श्री नरेन्द्रमोदी क्रोएशिया-देशस्य ऐतिहासिक-यात्रां कृत्वा सम्प्रति दिल्लीं प्रति प्रस्थितवान् । इयं हि यात्रा उच्चस्तीयवार्ताभि: परिपूर्णा आसीत्। अवधेय यत् श्री मोदिन: क्रोएशिया-देशे वैदिक मन्त्रोद्घाषै: रमणीयं स्वागतं अभवत्। असौ तत्रत्य प्रधानमन्त्रिणा प्लेन्कोविच् इत्यनेन सह वार्तालापं कृतवान्। अस्यां यात्रायां प्रतिनिधिमण्डल- स्तरस्य वार्ता:, प्रमुखक्षेत्रेषु सन्धय: सांस्कृतिक नीतय: च समाविष्टा: आसन्। एतद् विहाय भारत-क्रोएशिया-देशयो: विज्ञान-प्रौद्योगिक्या: कृषि-शिक्षा-संस्कृते: च प्रमुखेषु क्षेत्रेषु संधि-हस्ताक्षरं समभवत्। जाग्रेबविश्वविद्यालये हिन्दी-अध्यक्षस्य च स्थापना अभवत्, येन भारतस्य भाषावैज्ञानिक-शैक्षणिक-प्रसाराय प्रवर्धनं भविता।

ऑपरेशन सिन्धु

भारतदेशे प्रवर्तमानस्य " ऑपरेशन सिन्धु" इत्यभियानस्य अन्तर्गतं ईरानदेशात् दशाधिकैकशतं यावत् भारतीय-छात्रा: विमानेन सफलतया नवदिल्लीं सम्प्राप्तवन्त:। एतद्: विशिष्टविमानयानं अद्य प्रात: नवदिल्लीं प्रति आगच्छत्। ईरान-इस्रायल देशयो: मध्ये वर्धमानस्य संघर्षस्य सन्दर्भे उत्पन्नायां आपात्कालीन स्थितौ भारतदेशेन ऑपरेशन सिन्धु इति नामकं अभियानं संचालितम्।

इस्राइल-इरान्

इस्राइल्-इरान्-देशयोः मध्ये युद्धे उभौ देशौ परस्परं क्षेपणास्त्रं वायुप्रहारं च कुरुतः। अतः क्षेत्रीयसङ्घर्षस्य विस्तारः सम्भाव्यते। इरान्-देशस्य सर्वोच्चनेत्रा आयातुल्लाह-खामनेई इत्यनेन इस्राइल्-देशाय कठोरतया-संचेतना प्रदत्ता। सोशल मीडिया पोस्ट् इत्यत्र खामनेई इत्यनेन उक्तं यत् युद्धम् आरब्धम्। ततः पूर्वं अमेरिकीयः राष्ट्रपतिः डोनाल्ड ट्रम्पः इरान्देशम् आत्मसमर्पणस्य आग्रहं कृतवान् । इस्राइल्-देशेन क्रियमाणे विस्फोटक - प्रहारस्य विषये अमेरिका-देशस्य हस्तः नास्ति इति सः उक्तम् ।

एकं राष्ट्रं एकापृथिवी

समानापृथिवी समानं स्वास्थ्यं इति विषयमधिकृत्य वर्षस्यास्य जून मासस्य एकविंशति: दिनाङके अन्ताराष्ट्रिय योग दिवस: आचर्यते। अस्मिन् एव अवधौ अशेषे हि महाराष्ट्रे योगस्य विविधा: कार्यक्रमा: च आयोज्यन्ते। कोलहापुर जनपदस्याधिकारी अमोल

येगडे उपवेशनं समायोजयत् यत्र हि कार्यक्रमस्य विषये सर्वान् निर्दिष्टवान्। गामे-ग्रामे नगरे-नगरे कथं योगदिवस्य आचरणं भवेत् इत्यस्य विषये च स: सर्वान् अधिकारीन् निर्दिष्वान्।

## हाकी-इण्डिया-मास्टर्स्-

पंचविशत्युत्तर द्विसहस्र तम वर्षस्य हाकी-इण्डिया-मास्टर्स्-कप् प्रतिस्पर्धा ह्यः चेन्नै-नगरे आरभत, यत्र हि पुरुष-महिला-वर्गेषु प्रबलप्रदर्शनम् समाचरितम्। महिला-वर्गे कर्नाटक- हाकी दलेन केरला-हाकी-दलम् सप्त शून्यं इति अङ्कातरालेन पराजितम्। पुरुषाणां वर्गे हाकी-पञ्जाब्-दलं ले-पुदुचेरी-हाकी-दलम् 3-2 अङ्कैः पराजितम् । महिलाविभागे ओडिशा, हरियाणा, हिमाचल् प्रदेश, कर्नाटक, महाराष्ट्र, पञ्जाब्, तमिल्नाडु, केरल इत्यादीनि अष्टदलानि स्पर्धन्ते। पुरुषाणां वर्गे 11 दलानि सन्ति।